स्नेहाजीर्णे रोगिणां मुद्गचूर्णं
ज्वालां सुप्तो हन्ति वैरेचकानाम् ।
माषो भूयानिम्बमूलेन पाक-
श्चिञ्चा सुप्तव्यन्तता चूर्णयोगात् ॥
उष्णेन शीतं शिशिरेण चोष्ण-
मन्नेन च क्षारगणो गुणाय ।
स्नेहेन तीक्ष्णं वमनातियोगे
सिता हिता स्यादिति काशिराज: ॥
ताम्बूलमध्यस्थितचूर्णकेन
संदह्यते यस्य मुखं नरस्य ।
तैलेन वा केवलकाञ्जिकेन
सुखाय गण्डूषमथो विदध्यात् ॥
शीतोदकं नस्यजरोगहारि
नारीपयश्चाञ्जनरुग्विनाशि ।
शलोदकं धूमगदे प्रशस्तं
धात्रीप्रलेपोऽतिविरेचनेषु ॥
व्यायस्य मांसं श्रमजेऽनुकूलं
प्रवातभूमि: सुरतावसाने ।
क्षीरोपगास्तैल्यवसाधितन्तु
च्छागाण्डसुक्तं सुरतातिरेके ॥
श्रवणपूरणजे तिलतैलत:
श्रवणपूरणमेव सुखं विदु: ।
कवलजेषु गदेष्वथ कारयेत्
कवलमार्द्रकजद्रवजं पुन: ॥”
इति जीर्णमञ्जरी ॥

जीर्णज्वर:, पुं, (जीर्ण: पुरातनो ज्वर: ।) पुरातनज्वररोग: । अथ जीर्णज्वराधिकार: । तत्र जीर्णज्वरस्य सामान्यलक्षणमाह ।
“यो द्वादशभ्यो दिवसेभ्य ऊर्द्धं
दोषत्रयस्त्रिगुणेभ्य ऊर्द्धम् ।
कृशां तनौ तिष्ठति मन्दवेगो
भिषग्भिरुक्तो ज्वर एष जीर्ण: ॥” * ॥
जीर्णज्वरस्यैव विशेषं वातबलासकमाह ।
“नित्यं मन्दज्वरो रूक्ष: शून: कृच्छ्रेण सिध्यति ।
स्तब्धाङ्ग: श्लेष्मभूयिष्ठो नरो वातबलासकी ॥”
वातबलासकाख्यो ज्वरोऽस्यास्ति इति वातबलासकी । नर ईदृग्भवेत् । शून: शोथी । श्लेष्मभूयिष्ठो बहुलश्लेष्मक: ॥ * ॥
अथ जीर्णज्वरस्य सामान्यचिकित्सा ।
“जीर्णज्वरी नर: कुर्य्यान्नोपवासं कदाचन ।
लङ्घनात् स भवेत् क्षीणो ज्वरस्तु स्याद्बली यत: ॥
पुराणेऽपि ज्वरे दोषा यद्यपथ्यै: पुनस्तथा ।
लङ्घयेत्तं च तं पश्चात् पूर्ववत् कारयेत् क्रियाम् ॥”
तथा पूर्ववत् ॥ * ॥
“निदिग्धिकानागरकामृतानां
क्वाथं पिबेन्मिश्रितपिप्पलीकम् ।
जीर्णज्वरारोचककासशूल-
श्वासाग्निमान्द्यार्द्दितपीनसेषु ॥
हन्त्यूर्द्ध्वजानयं प्राय: सायं तेनोपयुज्यते ॥”
इति त्रिकण्टकक्वाथ: ॥ * ॥
“पिप्पलीचूर्णसंयुक्तक्वाथश्छिन्नोद्भवोद्भव: ।
जीर्णज्वरकफध्वंसी पञ्चमूलकृतोऽथवा ॥
अम्लतायाः कषायस्तु शीतलीकृतमीरितम् ।
मधुपादयुतं पीतं जीर्णज्वरहरं परम् ॥
पिप्पलीमधुसंमिश्रं गुडूचीस्वरसं पिबेत् ।
जीर्णज्वरकफप्लीहकासारोचकनाशनम् ॥
जीर्णज्वरेऽग्निमान्द्ये च शस्यते गुडपिप्पली ।
कासाजीर्णारुचिश्वासहृत्पाण्डुज्वररोगनुत् ॥
द्विगुणा: पिप्पलीचूर्णाद्गुडोऽत्र भिषजां मत: ।
पिप्पली मधुसंयुक्ता मेद:कफविनाशिनी ॥
श्वासकासज्वरहरी पाण्डुप्लीहोदरापहा ।
आमलं चित्रकं पथ्या पिप्पली सैन्धवं तथा ॥
चूर्णितोऽयं गणो ज्ञेय: सर्व्वज्वरहर: पर: ।
भेदी रुचिकर: श्लेष्महर्त्ता दीपनपाचन: ॥”
इति आमलक्यादिचूर्णम् ॥ * ॥
“द्राक्षाम्लता शटी शृङ्गी मुस्तकं रक्तचन्दनम् ।
नागरं कटुका पाठा भूनिम्ब: सदुरालभ: ॥
उशीरं धान्यकं पद्मं बालकं कण्टकारिका ।
पुष्करं पिचुमर्द्दश्च दशाष्टाङ्गमिदं स्मृतम् ॥
जीर्णज्वरारुचिश्वासकासश्वयथुनाशनम् ॥”
इति द्राक्षाद्यष्टादशाङ्गक्वाथ: ॥ * ॥
“त्रिवृद्ध्या पञ्चवृद्ध्या वा सप्तवृद्ध्याथवा कणा: ।
पयक्षीरेण संपिष्टा पिबेद्दश दिनानि हि ॥
तथैव न्यूनयेदेता एवं विंशतिवासरान् ।
पिबतां ज्वरशान्ति: स्यात् पाण्डुरोगश्च शाम्यति ॥
कास: श्वासोऽग्निमान्द्यञ्च कफाधिक्यञ्च नश्यति ।
चयादिवृद्धिर्यथाकफवृद्धि: दुग्धवृद्धिर्यथाग्निवृद्धि: ।
इति वर्द्धमानपिप्पली ॥ * ॥
“वातश्लेष्मज्वरोक्ता स्यात् क्रिया वातबलासके ।
जीर्णे ज्वरे कफे क्षीणे दाहतृष्णासमन्विते ॥
पय: पीयूषसदृशं तन्नवे तु विषोपमम् ।
चन्दनाद्यं हितं तैलं शीर्षाधिकारकीर्त्तितम् ॥
तथा नारायणं तैलं जीर्णज्वरहरं परम् ॥”
इति जीर्णज्वराधिकार: । इति भावप्रकाश: ॥

जीर्णदारु:, पुं, (जीर्णमिव दारु यस्य ।) वृद्धदारकभेद: । विधाराविशेष इति लोके । तत्पर्य्याय: । जीर्णफञ्जी २ सुपुष्पिका ३ अजरा ४ सूक्ष्मपर्णा ५ । अस्य गुणा: । गौल्यत्वम् । पिच्छिलत्वम् । कफवातकासामदोषनाशित्वम् । बल्यत्वञ्च । इति राजनिर्घण्ट: ॥

जीर्णपत्रिका, स्त्री, (जीर्णानि पत्राण्यस्या: । कप् ततष्टापि अत इत्वम् ।) वंशपत्रीतृणम् । इति राजनिर्घण्ट: ॥

जीर्णपर्ण:, पुं, (जीर्णानि पर्णानि यस्य ।) कदम्ब: । इति राजनिर्घण्ट: ॥ (जीर्णं पर्णं पत्रम् ।) पुरातनपत्र, क्ली ॥ (जीर्णं पर्णं ताम्बूलं इति विग्रहे पुरातनताम्बूले च । यदुक्तं वैद्यके ।
“पर्णमूले भवेद्व्याधि: पर्णाग्रे पापसम्भव: ।
जीर्णपर्णं हरेदायु: शिराबुद्धिप्रणाशिनी ॥”)

जीर्णबुध्न:, पुं, (जीर्णोऽदृढो बुध्नो मूलमस्य ।) पट्टिकालोध्र: । इति राजनिर्घण्ट: ॥

जीर्णबुध्नकं, क्ली, (जीर्णो बुध्नो मूलं यस्य । तत: कप् ।) परिपेलम् । इति राजनिर्घण्ट: ॥ केयोटसुता इति भाषा ॥

जीर्णवज्रं, क्ली, (जीर्णं वज्रं हीरकमिव ।) वैक्रान्तमणि: । इति राजनिर्घण्ट: ॥

जीर्णवस्त्रं, क्ली, (जीर्णं पुरातनं वस्त्रम् ।) पुरातनवस्त्रम् । तत्पर्य्याय: । पटच्चरम् २ । इत्यमर: । २ । ६ । ११५ ॥

जीर्णा, स्त्री, (जीर्य्यत्यग्नयेति । जृ + करणे क्त: ।) स्थूलजीरक: । इति राजनिर्घण्ट: ॥

जीर्णि:, स्त्री, (जॄ + क्तिन् ।) ज्यानि: । जीर्णता । इत्यमर: । ३ । २ । ६ ॥

जीर्णोद्धार:, पुं, (जीर्णानां भग्नमन्दिरादीनां उद्धार: संस्कार: ।) भग्नमन्दिरादे: संस्कार: । यथा, विष्णुधर्म्मोत्तरतृतीयकाण्डे ।
“यस्य राज्ञस्तु विषये देववेश्म विशीर्य्यते ।
तस्य सीदति तद्राष्ट्रं देववेश्म यथा तथा ॥
कृत्वा शीर्णस्य संस्कारं तथा देवेशवेश्मनि ।
द्विगुणं फलमाप्नोति नात्र कार्य्या विचारणा ॥”
विष्णुरहस्ये ।
“पतितस्य च य: कर्त्ता पतमानस्य रक्षिता ।
विष्णोरायतनस्येह स नरो विष्णुलोकभाक् ॥”
अग्निपुराणे ।
“पतितं पतमानन्तु तथार्द्धस्फुटितं नर: ।
समुद्धृत्य हरेर्धाम द्विगुणं फलमाप्नुयात् ॥”
देवीपुराणे ।
“मूलाच्छतगुणं पुण्यं प्राप्नुयाज्जीर्णकारक: ।
तस्मात् सर्व्वप्रयत्नेन जीर्णस्योद्धारमाचरेत् ॥”
हयशीर्षपञ्चरात्रे ।
“वापीकूपतडागानां सुरधाम्नां तथानघ ! ।
प्रतिमानां सभानाञ्च संस्कर्त्ता यो नरो भुवि ॥
पुण्यं शतगुणं तस्य भवेन्मूलान्न संशय: ।
प्रतिष्ठाया विधि: कार्य्यस्तथा मन्दिरनिर्म्मिते ॥
प्राय: श्रीहयशीर्षोक्तिरनुसारेण वैष्णवै: ।
देवालयप्रतिष्ठा च ख्याता तल्लिखनेन किम् ॥
श्रीमूर्त्तिस्थापनेनैव संपूर्णा सा विशेषत: ।
देवगृहं देवतायाः प्रतिष्ठाविधिना सदा ॥
संस्कार्य्यं मनुजानान्तु समुदाणोक्तकर्म्मणा ॥”
इति श्रीहरिभक्तिविलासे २० विलास: ॥

जीर्वि:, पुं, (जीर्य्यति छिन्नीभवत्यनेनेति । जॄ + “जॄशॄस्तॄजागृभ्य: क्विन् ।” उणां ४ । ५४ । इति करणे क्विन् ।) कुठार: । इति सिद्धान्तकौमुद्यामुणादिवृत्ति: ॥ (जीर्य्यतीति । कर्त्तरि क्विन् ।) प्रकटम् । काय: । पशु: । इति संक्षिप्तसारे उणादिवृत्ति: ॥

जीव, ऋ प्राणे । इति कविकल्पद्रुम: ॥ (भ्वां-परं-अकं-सेट् ।) ऋ, अजीजिवत् अजिजीवत् । प्राण: प्राणधारणम् । जीवति लोक: । इति दुर्गादास: ॥

जीव:, पुं, (जीवनमिति । जीव + “हलश्च ।” ३ । ३ । १२१ । इति घञ् ।) असुधारणम् । इत्यमर: । २ । ८ । ११६ । (यथा, हरिवंशे । १०४ । ७३ ।
“त्वमेव चिन्तय सखि ! नोत्तरं प्रतिभाति मे ।
स्वकार्य्ये मुह्यते लोको यथा जीवं लभाम्यहम् ॥”)